# लीलावती

## श्रीमद्भास्कराचार्यविरचिता

---

### ००१ - परिचयः

२५ - ०७ - २०१८

प्रस्तोता - आनन्दः विश्वनाथजः

# कालान्तरे द्रष्टव्याः विषयाः --

१) भारतीयगणितशास्त्रेतिहासः ।

२) आधुनिकगणितसिद्धान्तात् कथमस्माकं गणितसिद्धान्तः भिद्यते ।

३) लीलावत्याः काव्यसौन्दर्यम् ।

४) छन्दोविचारः ।

# सद्यः द्रष्टव्याः --

- भास्कराचार्यस्य देशकालकृतिविचारः ।
- लीलावतीपरिचयः ।
- मङ्गलश्लोकः ।

# भास्कराचार्यः

- प्रसिद्धगणितशास्त्रकारः , खगोलशास्त्रकारः च
- कालः - श ० १०३६ - ११०७ (१११४-११८५ क्रि )
- जन्मस्थानम् - विज्जलविड ( प्राचीनबीजपूरम् इति केचन, आधुनिकबिज्जरगिग्रामो वा)
- मुख्यग्रन्थौ –
  १) सिद्धान्तशिरोमणिः (श ० १०७२)
    अ) लीलावती (व्यक्तगणितम्/ पाटीगणितम्/अङ्कगणितम्)
    आ) बीजगणितम् (अव्यक्तगणितम्)
    इ) ग्रहगणितम्
    ई) गोलाध्यायः
  २) करणकुतूहलम् (खगोलशास्त्रसम्बद्धम्) (श ० ११०५)

- भास्करव्यवहारः , विवाहपटलः इति द्वौ ग्रन्थावपि भास्कराचार्येण विरचिताविति केषाञ्चनाभिप्रायः ।

# लीलावती

## अत्र विद्यमानेषु अंशेषु केचन --

मङ्गलश्लोकः

१) परिभाषाः

२) स्तुतिः , सङ्ख्यानां स्थानानि

३) सङ्कलितव्यवकलितकरणसूत्रम्

४) गुणनप्रकारः

५) भागहारकरणसूत्रम्

६) वर्गकरणसूत्रम्

७) वर्गमूलकरणसूत्रम्

८) घनसूत्रम्

९) घनमूलसूत्रम्

१०) प्रभागजातिसूत्रम्

११) मिश्रभिन्नसरलविधिः

१२) शून्यपरिकर्माष्टकम्

१३) व्यस्तविधिः

१४) त्रैराशिकम्

१५) मिश्रव्यवहारः

१६) श्रेढीव्यवहारः

१७) क्षेत्रव्यवहारः

१८) कुट्टकप्रकरणम्

# लीलावती

- नामकारणम्-
  - लीला + मतुप्  (अस्य/अस्या: अस्मिन्/अस्यां वा अस्तीति)
  - लीला -- केलिः। विलासः। शृङ्गारभावचेष्टा। (विश्वकोषः )
  - (लालित्यं , रमणीयत्वं  च)
  - भास्कराचार्यस्य पद्यानि प्रक्रियां विवृण्वन्ति अथवा उदाहरणरूपेण दृश्यन्ते यत्र अनुपमं लालित्यं वर्तते

# ३। लीलावत्याः कानिचन परम्परागतव्याख्यानानि

| | | |
|---|---|---|
| १ | नृसिंहसुतरामकृष्णरचिता गणितामृतलहरी | श ० १२६१ |
| २ | नृसिंहपुत्रनारायणकृता पाटीगणितकौमुदी | श ० १२७१ |
| ३ | गोवर्धनसूनुगङ्गाधरविरचिता गणितामृतसागरी | श ० १३४२ |
| ४ | सूर्यदासस्य गणितामृतकूपिका | श ० १४६० |
| ५ | गणेशदैवज्ञस्य बुद्धिविलासिनी | श ० १४६७ |
| ६ | शङ्करवारियार्-नारायणयोः क्रियाक्रमकरी | श ० १४८२ |
| ७ | महीदासस्य लीलावतीटीका | श ० १५०९ |
| ८ | मुनीश्वरस्य लीलवतीविवृतिः | श ० १५५७ |
| ९ | महीधरस्य लीलावतीविवरणम् | १५५७ शकोत्तरकालिकम् |
| १० | नृसिंहसुतरङ्गनाथस्य मितभाषिणी | श ० १५६२ |
| ११ | रङ्गनाथसुतमुनीश्वरस्य निःसृष्टार्थदूती | श ० १५७२ |
| १२ | नारायणस्य कर्मप्रदीपिका | |
| १३ | रामकृष्णदेवस्य मनोरञ्जना | |

# ग्रन्थप्रवेशः - मङ्गलश्लोकः

प्रीतिं भक्तजनस्य यो जनयते विघ्नं विनिघ्नन् स्मृतः
तं वृन्दारकवृन्दवन्दितपदं नत्वा मतङ्गाननम् ।
पाटीं सद्गणितस्य वच्मि चतुरप्रीतिप्रदां प्रस्फुटां
सङ्क्षिप्ताक्षरकोमलामलपदैर्लालित्यलीलावतीम् ॥ १ ॥

**अन्वयः -** यः स्मृतः भक्तजनस्य विघ्नं विनिघ्नन् प्रीतिं जनयते, तं वृन्दारकवृन्दवन्दितपदं मतङ्गाननं नत्वा (अहं) चतुरप्रीतिप्रदां प्रस्फुटां सङ्क्षिप्ताक्षरकोमलामलपदैः लालित्यलीलावतीं सद्गणितस्य पाटीं वच्मि ।

# मङ्गलाचरणम्

कठिनपदार्थाः , समासाः –

- वृन्दारकवृन्दवन्दितपदं - वृन्दारकानां वृन्दैः वन्दिते पदे यस्य सः (वृन्दारकाः = देवाः , वृन्दं = समूहः , पदं = पादः), तम्
  देवसमूहेन वन्दितौ पादौ यस्य सः इत्यर्थः
- मतङ्गाननं - मतङ्गस्य आननम् इव आननं यस्य सः (मतङ्गः = गजः) , गजाननः इत्यर्थः, तम्
- चतुरप्रीतिप्रदां - प्रीतिं प्रददाति इति प्रीतिप्रदा । चतुराणां / चतुरेभ्यः प्रीतिप्रदा इति चतुरप्रीतिप्रदा, ताम्
- प्रस्फुटां - सुस्पष्टा, ताम्
- सङ्क्षिप्ताक्षरकोमलामलपदैः - सङ्क्षिप्तम् अक्षरं = सङ्क्षिप्ताक्षरम् । कोमलानि च अमलानि च = कोमलामलानि । सङ्क्षिप्ताक्षराणि च कोमलामलानि च सङ्क्षिप्ताक्षरकोमलामलानि । सङ्क्षिप्ताक्षरकोमलामलानि पदानि = सङ्क्षिप्ताक्षरकोमलामलपदानि, तैः
- लालित्यलीलावतीं -लालित्येन युक्ता लालित्ययुक्ता। लालित्ययुक्ता लीलावती लालित्यलीलावती, ताम्
- पाटीं - प्रक्रियाम्



# मङ्गलाचरणम्

प्रीतिं भक्तजनस्य यो जनयते विघ्नं विनिघ्नन् स्मृतः
तं वृन्दारकवृन्दवन्दितपदं नत्वा मतङ्गाननम् ।
पाटीं सद्गणितस्य वच्मि चतुरप्रीतिप्रदां प्रस्फुटां
सङ्क्षिप्ताक्षरकोमलामलपदैर्लालित्यलीलावतीम् ॥ १ ॥

सरलार्थः –

यः स्मृतश्चेत् भक्तानां विघ्नान् नाशयित्वा तेषां सुखं जनयति, देवसमूहेन वन्दितचरणं तादृशं गजाननं नमामि । ततः चतुराणां प्रीतिदायिकां सुस्पष्टां सङ्क्षिप्ताक्षरकोमलामलपदैः विरचितां लालित्ययुक्तां लीलावतीं सद्गणितस्य प्रक्रियां वदिष्यामि ।

# मङ्गलाचरणम्

अनुबन्धचतुष्टयम् –

- अधिकारी
- प्रयोजनम्
- सम्बन्धः
- विषयः

मङ्गलस्य स्वरूपाणि त्रीणि - आशीर्नमस्क्रिया वस्तुनिर्देश:

# संवत्सरेषु स्थूलतया सम्बन्धः

- ५८ विक्रमसम्वत् = १ क्रैस्तवसम्वत्।
- ७९ क्रैस्तवसम्वत् = १ शालिवाहनशकम् ।




उदाहरणम् --

इदं वर्षं २०१८ क्रैस्तवसंवत्

- २०१८ = २०७४ विक्रमसंवत् (वि ० / सं ० )
- २०१८ = १९४० शालिवाहनशकवर्षम् (श ० )

# संवत्सरेषु स्थूलतया सम्बन्धः




- आङ्ग्लवर्षं गणय

  संवत् २००९, शके १८७४.

- शकवर्षं गणय

  विक्रमाब्द १९६९ इसुवर्षं १९१२

- दोषं दर्शय

  २०३६ तमे वैक्रमाब्दे   २००१ तमे शकाब्दे   १९७९ तमे ख्रैस्ताब्दे



# लीलावती

## श्रीमद्भास्कराचार्यविरचिता

## ००१ - परिचयः